चमितुम्, चामयितुम्, चिचमिषितुम्, चञ्चमितुम्;
[1]चान्तिः, चामना, चिचमिषा, चञ्चमा;
आचमनम्, चामनम्, चिचमिषणम्, चञ्चमनम्;
[2]चमित्वा-चान्त्वा, चामयित्वा, चिचमिषित्वा, चञ्चमित्वा;
आचम्य, आचाम्य, आचिचमिष्य, आचञ्चम्य;
चमम् २, आचामम् २, चमित्वा २, चान्त्वा २, } चामम् २, चामयित्वा २, } चिचमिषम् २, चिचमिषित्वा २, } चञ्चमम् २; चञ्चमित्वा २; }
[3]चमूः,[A] [4]चमटः, [5]चमसः.

(501) "चमु भक्षणे" (V-स्वादिः-1274. सक. सेट्. पर.) छान्दसः ।

चमकः-आचामकः-मिका, चामकः-मिका, चिचमिषकः-षिका, चञ्चमकः-चञ्चमकः-मिका;

इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकभक्षणार्थकचमुधातुवत् (500) बोध्यानि । [6]चम्नुवन्-चम्नुवती, इति शतरि परं विशेषः । [7]मखचमी[B] ।

---

1. 'तितुत्रतथ—' (7-2-9) इतीण्णिषेधे, दीर्घे, अनुस्वारे, परसवर्णे च रूपम् ।
2. 'उदितो वा' (7-2-56) इति क्त्वायामिड्विकल्पः । इडभावपक्षे दीर्घानुस्वारपरसवर्णा बोध्याः ।
3. 'कृषिचमितनि—' [द. उ. 1-164] इति ऊप्रत्ययः । **चमूः**=सेना ।
4. 'शकादिभ्योऽटन्' [द. उ. 5-2] इत्यटन् प्रत्ययः । चमतीति **चमटः**=घस्मरः ।
5. 'अत्यविचमि—' [द. उ. 9-44] इत्यादिना असच् प्रत्ययः । चमति अस्मिन् इति **चमसः**=यज्ञीयपात्रविशेषः ।
6. '**स्वादिभ्यः** श्नुः' (3-1-73) इति श्नुः विकरणप्रत्ययः । संयोगपूर्वकत्वात्, 'अचि श्नुधातुभ्रुवाम्—' (6-4-77) इत्युवङादेशः । अस्य धातोः छान्दसत्वात् 'छन्दसि दृष्टानुविधिः' इति न्यायोऽनुसन्धेयः ।
7. मखं चम्नोतीति **मखचमी** । 'सुप्यजातौ—' (3-2-78) इति ताच्छील्ये णिनिः । 'नोदात्तोपदेशस्य मान्तस्यानाचमेः' (7-3-34) इति वृद्धिप्रतिषेधः ।

A. 'अथ भूतानि वार्त्रघ्नशरेभ्यस्तत्र तत्रसुः ।
मेजे दिशः परित्यक्तमहेष्वासा च सा चमूः॥' **किरातार्जुनीये**-15-1.

B. 'क्ष्मां दघ्नुवन् **मखचमि**व्यसनानि रिण्वन्
ऋक्षिण्वतां चिरयणैरपथं जिरिण्वन् ।' धा. का. 2-71.